*This contains 12 pages*

# केन्द्रीय विद्यालय संगठनम् - क्षेत्रीय कार्यालयः - एरणाकुलम्

## सङ्कलनात्मकं मुल्याङ्कनम् (द्वितीयसत्रम्)

**D**

**E10122**

**SUMMATIVE ASSESSMENT II**

अवधिः होरात्रयम्

Time Allowed : 3 hrs

## संस्कृतम् (संप्रेषणात्मकम्)

**COMMUNICATIVE SANSKRIT**

पूर्णाङ्काः 90

Maximum Marks : 90

**दशमी कक्षा**

| | | | |
|---|---|---|---|
| खण्डः क | - | अपठित - अवबोधनम् | 15 अङ्काः |
| Section A | - | Unseen Reading Comprehension | |
| खण्डः ख | - | रचनात्मककार्यम् | 15 अङ्काः |
| Section B | - | Writing Skills | |
| खण्डः ग | - | अनुप्रयुक्त व्याकरणम् | 30 अङ्काः |
| Section C | - | Applied Grammar | |
| खण्डः घ | - | पठित - अवबोधनम् | 30 अङ्काः |
| Section D | - | Reading Comprehension | |
| | | **योगः** | **90 अङ्काः** |

**निर्देशाः**

i. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाःसन्ति।
This Question paper has four sections

ii. प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि ।
The answers have to be written in a separate answer booklet.

iii. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
The answers to each section must be written at one place.

iv. प्रश्न पत्रे उत्तराणि न लेखनीयानि
Don't write answers in the Question paper

v. प्रश्नसंख्या प्रश्नपत्रानुसारम् एव लेखनीया
Write The Question number according to the question paper

vi. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि
Answer all the questions in sanskrit.

# क) अपठितावबोधनम् (15)

**I. अधोलिखितमनुच्छेदं पठित्वा तदाधारित प्रश्नान् उत्तरत-**

वाणी मैत्रीं वर्धयति। वाणी एव मैत्रीं भेदयति अपि। वाणी सरसताम् उत्पादयति। वाणी एव विरसतायाः कारणम् अपि भवति। वाण्या सङ्घटनं भवति, वाण्या विघटनम् अपि भवितुम् अर्हति। वाणी मनांसि तोषयेत्। कदाचित् कलुषयेत् अपि। वाणी जनान् आकर्षेत्, दूरीकुर्यात् अपि। अतः स्वस्य वाणी परिलक्ष्यताम्।

वाणी मनसः प्रतिबिम्बम् (दर्पणः वा) इति कथ्यते - मनसि विद्यामानाः भावाः शब्दरूपेण बहिः आयान्ति, तथा च तस्मिन् काले मनसि वर्तमानाः भावाः उच्यमानशब्दानां ध्वनिना अभिव्यक्ताः भवन्ति। तस्मात् कस्यचित् वाणीं श्रुत्वा तस्य मनः अस्माभिः स्वल्पमात्रेण अवगन्तुं शक्यते। श्रोतारः अस्माकं वाणीं परिलक्षयन्ति। अतः ततः पूर्वं स्वयमेव स्वस्य वाणीं परिलक्षयेम

**1 एकपदेन उत्तरं लिखत** (1x2=2)

1. का मैत्रीं वर्धयति
2. कया सङ्घटनं भवति। ।

**2 पूर्णवाक्येन उत्तरं लिखत** 1x2=2

1. वाणी कस्य प्रतिबिम्बम् अस्ति
2. वाणी कानि तोषयेत्।

**3 निर्देशानुसारं समुचितमुत्तरं विकल्पेभ्यः चित्वा लिखत** 1x4=4

1. **'नरान्'** इत्यर्थे अनुच्छेदे किं पदं प्रयुक्तम्

   अ) वाणी आ) जनान् इ) मैत्रीं ई) मनांसि

2. **'भवितुम्'** इत्यत्र कः प्रत्ययः

   अ) तुमुन् आ) ल्यप् इ) क्त ई) किमपि न

3. **'वर्धयति'** इति क्रियापदस्य कर्तृपदं भवति

अ) मैत्रीं आ) सरसताम् इ) एव ई) वाणी

4. **'मनसः'** इत्यत्र का विभक्तिः?

अ) प्रथमा आ) पञ्चमी इ) षष्ठी ई) सप्तमी

4. अस्य गद्यभागस्य एकं समुचितं शीर्षकं लिखत (2)

**II. अधोलिखितं श्लोकं पठित्वा तदाधारितप्रश्नान् उत्तरत**

विद्या ददाति विनयं

विनयात् याति पात्रताम्।

पात्रत्वात् धनमाप्नोति

धनात् धर्मः ततः सुखम्।।

1. एकपदेन उत्तरं लिखत (1x1=1)

1. कस्मात् पात्रतां याति।

2. पूर्णवाक्येन उत्तरं लिखत (1x2=2)

1. का विनयं ददाति

2. कस्मात् सुखं प्राप्नोति।

3. निर्देशानुसारं समुचितमुत्तरं विकल्पेभ्यः चित्वा लिखत। (1x2=2)

1. 'प्राप्नोति' इत्यत्र कः धातुः

अ) प्र आ) आप् इ) ति ई) धनम्

2. 'दुःखं' इत्यस्य विलोमपदं किं भवति।

अ) धर्मः आ) धनं इ) सुखम् ई) विद्या

## ख) रचनात्मकम् कार्यम् (15)

**I. भवान् माधवः। भवतः ग्रामे स्वास्थ्यकेन्द्रस्योद्घाटनं भवति। भवतः मनसः आह्लादस्य वर्णनं कुर्वन् भवान् मित्रं नारायणं प्रति लिखितं पत्रं मञ्जूषातः उचितपदं चित्वा रिक्तस्थानानि पूरयत।** (½x10=5)

सुब्रह्मण्यपुरीतः

14.11.2013

प्रियमित्र (1)_______

(2)_______ ते

भवतः पत्रं प्राप्तम्। वार्त्ताः अवगताः। हर्षस्य विषयोऽयं यत् अस्माकं (3)________ मण्डलाधिकारिभिः स्वास्थ्यकेंन्द्रस्योद्घाटनं (4) _________ तारिकायां करिष्यते। सर्वे (5) _________ वार्तां (6) ________ ज्ञात्वा (7) ________ सज्जाताः। अनेन स्वास्थ्यकेन्द्रेण (8) _________ चिकित्सा ग्रामे एव भविष्यति। ग्रामीणाः इतःपरं उपनगरं (9) ______ न गमिष्यन्ति। एतेन न केवलं ग्रामीणानां धनस्य अपव्ययो न भविष्यति परं तेषां (10) _________ नाशोऽपि न भविष्यति। अल्पीयसाकालेन रोगेषु अपगतेषु ग्रामे सुखं भविष्यति। आमयात् मुक्तान् जनान् दृष्टुं भवान् मम ग्रामं आगच्छतु।

मातृपितृचरणयोः प्रणामाः। अनुजायै च शुभाशिषः।

भवतां अभिन्नं मित्रम्

माधवः।

**(एताम्, समयस्य, नारायण!, 25.11.2013, ग्रामीणाः, नमः, रोगपीडितानां, ग्रामे, चिकित्सायै, प्रसन्नाः)**

**II.अ)अधोदत्तचित्रस्य वर्णनं मञ्जूषायां प्रदत्तपदानां सहायतया पञ्जवाक्येषु कुरुत।** (2x5=10)

**मञ्जूषा**

| |
|---|
| **उद्यानं, दोला, बालिका, बालकः, नीडं, खगः, पुष्पाणि, बिडालः, वृक्षाः, गृहं, चित्रशलभाः, पर्वतः** |



अथवा

II.आ) 'स्वामिविवेकानन्दः' इति विषयमधिकृत्य मञ्जूषायाः सहायतया पञ्चसंस्कृतवाक्यानां निर्माणं कुरुत। (2x5=10)

मञ्जूषा

युगप्रभावः, श्रीरामकृष्णपरमहंसः, 50th जन्मवार्षिकम्, भुवनेश्वरी देवी, चिक्कागो, प्रभाषणम्, कन्याकुमारी, कल्कत्ता देशः, विद्याभ्यासदर्शनम् स्वस्थे शरीरे एव स्वस्थं मनः

## ग) अनुप्रयुक्तव्याकरणम् (30)

I अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं सन्धिविच्छेदं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत- (1x4=4)

1. <u>सह</u> + <u>नौ</u> + <u>अवतु</u> इति वैदिको मन्त्रः।

   अ) सहनाभवतु आ) सहनाबवतु इ) सहनाववतु ई) सहनौबवतु

2. <u>कीटः</u> + <u>अपि</u> सुमनस्सङ्गात् आरोहति सतां शिरः

   अ) किटोपि आ) कीटोऽपि

   इ) कीटःपि ई) कीटःअपि

3. <u>'नमस्ते'</u> इति अध्यापकः अवदत्।

   अ) नमस् + ते आ) नमः + त इ) नमः+ते ई) नमस्त+ए

4. **गुरुम्** + **नमामि** इति शिष्यः अवदत्।

अ) गुरुम्मयाम् आ) गुरु नमामि इ) गुम + नमामि ई) गुरुं नमामि।

**II. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत**

(1x5=5)

1. **रामकृष्णौ** विद्यालयं गच्छतः

अ) रामाः कृष्णः च आ) रामं कृष्णं च

इ) रामाः कृष्णः च ई) रामः कृष्णः च

2. राजा **अनुमृगं** धावति।

अ) मृगं मृगं आ) मृगाय

इ) मृगस्य पश्चात् ई) मृगस्य अग्रे

3. उद्याने **बहुफलः** (वृक्षः) अस्ति।

अ) बहः फलः यस्य सः आ) बहू फलानि

इ) बहानि फलानि यस्यां सा ई) बहूनि फलानि यस्मिन् सः

4. सः **गुरोः समीपं** गत्वा पठति।

अ) उपगुरुं आ) उपगुरु

इ) उपगुरौ ई) उपगुर्वे

5. **चन्द्रः इव मुखं यस्याः सा** बालिका सर्वेषां मनः हरति स्म।

अ) चन्द्रमुखः आ) चन्द्रमुखी

इ) चन्द्रमुखाः ई) चन्द्रायमुखी

**III अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा समुचितम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत।** (1x5=5)

1. वानरस्य **चपल** + **त्व** छात्राय न रोचते।

अ) चपलत्वस्य आ) चपलत्वं

इ) चापलत्वं ई) चपात्व

2. **निर्धनता** दुःखदायिनी भवति

अ) निर्धन + ता आ) निधन + तल्

इ) निर्धन + त्व ई) निधन + भावम्

3. **<u>कम्प्</u>** + **<u>शानच्</u>** लताभ्यः फलानि पतन्ति

अ) कम्पमाना आ) कम्पमानाभ्यः

इ) कम्पमानां ई) कम्पमानच्

4. **<u>गायक</u>** + **<u>टाप्</u>** मण्डपे गायति।

अ) गयका आ) गायिका

इ) गायिकी ई) गायकी

5. **<u>धाव</u>** + **<u>शतृ</u>** बालिका हसति ।

अ) धावती आ) धावन्

इ) धावन्त्या ई) धावन्ती

**IV प्रदत्तविकल्पेभ्यः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत (1x5=5)**

1. _______ धूमः तत्र वह्निः।

अ) तत्र आ) कुत्र

इ) उपयत्र ई) यत्र

2. _______ पिता दिल्लीं गमिष्यति।

अ) ह्यः आ) श्वः

इ) परह्यः ई) अद्य

3. गृहात् _______ मा गच्छ।

अ) अतः आ) अधः

इ) बहिः ई) अन्तः

4. सुखार्थिनः ________ विद्या।

अ) किमर्थं आ) कदा

इ) कुतः ई) न

5. ________ वार्ताः श्रूयन्ताम्

अ) कदा आ) श्वः

इ) संप्रति ई) न

**V उचितसंख्यापदेन रिक्तस्थानानि पूरयत**

**(1x5=5)**

मम कक्षायां (i) (20)__________ बालकाः (ii) (30) _______ बालिकाः च सन्ति। अस्माकं विद्यालये (iii) (2) ________ क्रिडाक्षेत्रे (iv) (4) ________ विज्ञानप्रयोगशालाः च सन्ति। विद्यालयस्य पुरतः एव (v) (2) _______ वृक्षौ भवतः।

**VI अधोलिखितवाक्येषु रेखांकितपदं अशुद्धमस्ति। उचितमुत्तरं प्रदत्तविकल्पेभ्यः चित्वा अशुद्धपदं संशोध्य लिखत।** (1x6=6)

1) वयं संस्कृतपरीक्षां **लिखन्ति**।

अ) लिखामि आ) अलिखं इ) लिखामः ई) लिखावः

2) अद्य शनिवासरः **अभवत्**।

अ) स्तः आ) भविष्यति इ) अभवत् ई) भवति

3) सः **गुरवै** नमति।

अ) गुरवे आ) गुरुं इ) गुरु ई) गुरौ

4) दातारः धनं **यच्छतः**

अ) यच्छन्ति आ) यच्छतः इ) यच्छति ई) अयच्छत्

5) बालकः **मधुना** पिबति।

अ) मधु आ) मधू इ) मधुं ई) मधुभ्यां

6) रामेण सह कृष्णः **गच्छन्ति**।

अ) गच्छति आ) गच्छतः इ) अगच्छन् ई) गमिष्यतः

## घ) पठितावबोधनम् (30)

**I. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत।** (4)

मम कलनस्य तु आधारः सुर्य एव। सूर्यस्य द्वे गती उत्तरायणम् दक्षिणायनञ्च। प्रत्येकम् अयनस्य अवधिः षण्मासाः। भारतीयमासानां नामानि नक्षत्रनामभिः सम्बद्धानि। पूर्णिमायां यत् नक्षत्रं भवति तेनैव नाम्ना तस्य मासस्य नाम भवति। यथा चैत्रे मासे पूर्णिमा चित्रानक्षत्रयुता भवति, अतः तस्य मासस्य नाम 'चेत्रः' भवति।

1 **एकपदेन उत्तरं लिखत**

कः मम कलनस्य आधारः

2. **पूर्णवाक्येन उत्तरं लिखत**

भारतीय मासानां नामानि कैः सम्बद्धानि।

3. **निर्देशानुसारं उचितमुत्तरं विकल्पेभ्यः चित्वा लिखत।**

1. **'द्वे गती'** अनयोः विशेषणं किम्।

अ) गती आ) सूर्यस्य

इ) द्वे ई) न

2. **'दिनकरस्य'** इत्यर्थे अनुच्छेदे किम् पदं प्रयुक्तम्।

अ) आधारः आ) मासे

इ) सूर्यस्य ई) चैत्रः

**II. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत।** (4)

अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।
तदेवाहुः महात्मानः समात्वमिति तथ्यतः।।

1. **एकपदेन उत्तरं लिखत**

के आहुः

2. **पूर्णवाक्येन उत्तरं लिखत**

समत्वं वस्तुतः कदा भवति।

3. **निर्देशानुसारम् समुचितमुत्तरं विकल्पेभ्यः चित्वा लिखत-**

1. **'वस्तुतः'** इत्यर्थे अनुच्छेदे किम् पदं प्रयुक्तम्।

अ) अवक्रता आ) वक्रता

इ) तथ्यतः ई) आहुः

2. **'महात्मानः'** इत्यत्र किम् वचनम्।

अ) एकवचनम् आ) द्विवचनम्

इ) बहुवचनम् ई) प्रथमपुरुषः

**III. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत।** (4)

(ततः पुत्रशोकसन्तप्ताः युधिष्ठिरः भीमः द्रौपदी च रणभूमौ प्रविशन्ति।)

द्रौपदी - (दीर्घं निःश्वस्य) हा हन्त। किम् इदं घोरम् आपतितम्। पापकर्मणा द्रौणिना मे पुत्राः भ्रातरः च हताः। अग्निः इव दहति माम् अयं शोकः।

युधिष्ठिरः - शुभे! धैर्यं धारय। नूनं तव पुत्राः वीरगतिम् एव प्राप्ताः। वीरजननी त्वं शोचितुं न अर्हसि।

द्रौपदी - कथं मन्दभाग्या अहं धैर्यं धारयामि। यावत् असौ क्रूरकर्मा न दण्ड्यते, तावत् अहम् इतः न गमिष्यामि, अत्रैव प्राणत्यागं च करिष्यामि।

1. **एकपदेन उत्तरं लिखत**

शोकः अग्निः इव कां दहति

2. **पूर्णवाक्येन उत्तरं लिखत**

रणभूमौ के प्रविशन्ति।

3. **निर्देशानुसारं विकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत**

1. **'धारय'** इति क्रियापदस्य कर्तृपदं भवति।

अ) अहं आ) युधिष्टिरः

इ) द्रौपदी ई) त्वं

2. **'क्रूरकर्मा'** इत्यत्र किं लिङ्गम्

अ) पुल्लिङ्गम् आ) स्त्रीलिङ्गम्

इ) नपुंसकलिङ्गम् ई) अव्ययम्

**IV. अधोलिखितस्य कथनद्वयस्य समुचितं भावं प्रदत्त-विकल्पेभ्यः चित्वा उत्तरपुस्तिकायां लिखत।**

(2)

1 1. आपदां तरणिः धैर्यम्

अ) आपत्काले तरणिः धैर्यम् ददाति ।

ब) धैर्यम् अस्मान् आपत्काले नौका इव क्लेशं तर्तुं सहकरोति।

स) धैर्यम् आपदि न सहकरोति।

द) आपत्काले तरणिः नास्ति।

2. विश्वस्य आत्माऽहम्

अ) कालः यत्र तत्र व्याप्तः।

ब) कालः संसारस्य आत्मा न।

स) विश्वस्य नियन्ता अहम्।

द) अहं विश्वं न जानामि।

**V. मञ्जूषातः समुचितं पदं चित्वा अधोलिखितश्लोकद्वयस्य अन्वयं पूरयत- (4)**

(क) काकः कृष्णः पिकः कृष्णः, को भेदः पिककाकयोः।
वसन्तसमये प्राप्ते, काकः काकः पिकः पिकः।।

अन्वयः - ................[1] कृष्णः पिकः ..............[2] पिककाकयोः कः भोदः? वसन्तसमये ..............[3] काकः काकः पिकः ................[4]।।

(ख) आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः।।

अन्वयः - आचारः ...........[5] धर्मः इति एतत् विदूषां ..........[6] तस्मात् प्राणेभ्यः ..............[7] सदाचारं विशेषतः ...........[8] ।

**मञ्जूषा**

(काकः, पिकः, वचः, प्रथमः, रक्षेत्, कृष्णः, अपि, प्राप्ते)

**VI. वाक्येषु रेखाङ्कितपदानां उचितं प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत (5)**

(क) **विषादं** त्यक्त्वा उद्यमः क्रियताम्

(ख) **धैर्यवान्** लोके परिभवं न प्राप्नोति।

(ग) **चत्वारि** युगानि सन्ति।

(घ) संसारे विद्वांसः ज्ञानचक्षुभिः **नेत्रवन्तः** कथ्यन्ते।

(ङ) **प्रकृतिमातुः** एषा सृष्टिः रमणीया एव।

**VII. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं पुनः लिखत।** **(4)**

(क) प्रच्छन्नभाग्यः स्वगृहं 'साधुवृत्तिं समाचेरत्' इति चिन्तयन् अगच्छत्।

(ख) दुष्टबुद्धिः तु सद्वचनानि तिरस्कृत्य चोरार्थम् अगच्छत्

(ग) सखे! यदि मित्रस्थाने मां परिगणयसि तर्हि साधुजनगर्हितं इमं पन्थानं त्यजतु भवान्।

(घ) कथमत्र नतोन्नते विषमे मार्गे क्रीडथ इति तौ क्रीडतः बालकान् पृच्छतः।

(ङ) नतोन्नते विषमे मार्गे कान्श्चित् क्रिडतः बालकान् वीक्ष्य तौ अपृच्छताम्।

(च) इदं वचनं विशेषेण मामेव लक्ष्यीकरोति इति प्रच्छन्नभाग्यः पश्चात्तापपुरस्सरं अचिन्तयत्

(छ) यदि एवं तर्हि कथं सुपथं परित्यज्य अनेन कुपथेन गन्तुं प्रवृत्तौ इति तेषु उद्दण्डः बालकः अपृच्छत्

(ज) दुष्टबुद्धिः प्रच्छन्नभाग्यश्च चौर्यार्थं ग्रामान्तरं गच्छतः स्म।

**VIII रेखाङ्कितपदानां प्रसंगानुसारं उचितम् अर्थं चित्वा लिखत-** **(3)**

(क) विचित्रा खलु **दैवगतिः**।

(i) दैव विपाकः (ii) देवः

(iii) नियतिः (iv) साधुवृत्तिः

(ख) परमहम् अखण्डः शाश्वतः **विभुः** च

(i) सर्वव्यापी (ii) शक्तिशाली

(iii) विश्वं (iv) कालः

(ग) भवतां जिज्ञासां **शमयितुम्** इच्छामि

(i) जनयितुम् (ii) शान्तां कर्तुं

(iii) वर्धयितुम् (iv) द्रष्टुं

***